२६८

९

३ ॐनमोनमः ॥ ब्रह्मादेवानांप्रथमःसंबभूवविश्वस्यकर्ताभुवनस्यगोप्तासब्रह्मविद्यांसर्वविद्याप्र
१ तिष्ठामथर्वायज्येष्ठपुत्रायप्राह अथर्वणेयांप्रवदेतब्रह्मा अथर्वातांपुरोवाचांगिरेब्रह्मविद्यां
सभारद्वाजायसत्यवहायप्राह भारद्वाजोंगिरसेपरावरांशौनकोहवैमहाशालोंगिरसंविधि
वदुपसन्नःपप्रच्छ कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीति तस्मैसहोवाच द्वेविद्ये
वेदितव्येइतिहस्मयद्ब्रह्मविदोवदंति पराचैवापराचतत्रापराऋग्वेदोयजुर्वेदःसामवेदोथ
ति६ र्ववेदःशिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योतिषमितिअथपरायया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्रा
ह्यमगोत्रमवर्णमचक्षुःश्रोत्रंतदपाणिपादंनित्यं विभुंसर्वगतंसुसूक्ष्मंतदव्ययंयद्भूतयोनिंपरि
पश्यंतिधीराः यथोर्णनाभिःसृजतेगृह्णतेचयथापृथिव्यामोषधयःसंभवंतियथासतःपु
रुषात्केशलोमानितथाक्षरात्संभवतीहविश्वं तपसाचीयतेब्रह्मततोन्नमभिजायते अन्ना
त्प्राणोमनःसत्यंलोकाःकर्मसुचामृतं यःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपःतस्मादेत
द्ब्रह्मनामरूपमन्नंचजायते ॥ प्रथमखंडः । १॥ तदेतत्सत्यंमंत्रेषुकर्माणिकवयो
यान्यपश्यंस्तानित्रेतायांबहुधासंततानि तान्याचरथनियतंसत्यकामाः ॥ १

उ॰ प्रसवेन जुषेत ब्रह्मपूर्व्यं तत्र योनिं कृणवसे न हि ते पूर्त्तमक्षिपत् त्रिरुन्नतं स्थाप्य समं शरीरं हृदींद्रिया
२ णि मनसा संनिवेश्य ब्रह्मोडुपेन प्रतरेत विद्वान्स्रोतांसि सर्वाणि भयावहानि प्राणान्प्रपीड्येह संयुक्त
चेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत दुष्टाश्वयुक्तमिव वाहमेनं विद्वान्मनो धारयेताप्रमत्तः समे
शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः मनोनुकूले न तु चक्षुपीडने गुहानिवा
उ५ ताश्रयणे प्रयोजयेत् नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशीनां एतानि रूपाणि पु
रःसराणि ब्रह्मण्यभिव्यक्तिकराणि योगे पृथ्व्याप्यतेजोनिलखे समुत्थिते पंचात्मके योगगुणे प्र
वृत्ते न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरं लघुत्वमारोग्यमलोलुपत्वं वर्ण
२ प्रसादं स्वरसौष्ठवं च गंधः शुभो मूत्रपुरीषमल्पं योगप्रवृत्तिं प्रथमां वदंति यथैव बिंबं मृदयो
पलिप्तं तेजोमयं भ्राजते तत्सुधांतं तद्वात्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः
यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत् अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते
सर्वपाशैः एष हि देवः प्रदिशोनु सर्वाः पूर्वो हि जातः स उ गर्भे अंतः स एव जातः स जनिष्यमाणः
प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः यो देवो अग्नौ यो अप्सु यो विश्वं भुवनमाविवेश य ओषधीषु यो २
वनस्पतिषु तस्मै देवाय नमो नमः ॥ इति श्वेताश्वतरोपनिषदि द्वितीयोध्यायः ॥ य एको जा

भूयश्चान्ते विश्वमायानिवृत्तिः ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः तस्या
भिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदित
व्यं हि किंचित् भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् वह्नेर्यथा योनिगतस्य मूर्त्ति
र्न दृश्यते नैव च लिंगनाशः स भूय एवेंधनयोनिगृह्यस्तद्वोभयं वै प्रणवेन देहे स्वदेहमरणिं कृत्वा
प्रणवं चोत्तरारणिं ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् तिलेषु तैलं दधिनीव सर्पिरापः
स्रोतस्स्वरणीषु चाग्निः एवमात्मात्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति सर्वव्यापिनमात्मानं क्षी
रे सर्पिरिवार्पितं आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परं तद्ब्रह्मोपनिषत्परमिति ७ इति श्वेताश्वत
रोपनिषदि प्रथमोऽध्यायः ७ युंजानः प्रथमं मनस्तत्त्वाय सविता धियः अग्नेर्ज्योतिर्निचाय्य पृथि १८
व्या अध्याभरत् युक्तेन मनसा वयं देवस्य सवितुः सवे सुवर्गेयाय शक्त्या युक्त्वाय मनसा देवान्
४ सुवर्यतो धिया दिवं बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् युंजते मन उत युंजते धियो वि
प्रा विप्रस्य बृहतो विपश्चितः विहोत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः युजे वां
ब्रह्म पूर्व्यं नमोभिर्विश्लोक एतु पथ्येव सूरेः शृण्वंतु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि
तस्थुः अग्निर्यत्राभिमथ्यते वायुर्यत्राधिरुध्यते सोमो यत्रातिरिच्यते तत्र संजायते मनः सवि

उ॰ रुषोंतरात्मासदाजनानांहृदयेसंनिविष्टः हृदामनीषामनसाभिक्लृप्तोयएतद्विदुरमृतास्तेभवंति
३ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलंपुरुषएवेदंस
र्वंयद्भूतंयच्चभव्यं उतामृतत्वस्येशानोयदन्नेनातिरोहति सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं
सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति सर्वेंद्रियगुणाभासंसर्वेंद्रियविवर्जितं सर्वस्यप्रभु
मीशानंसर्वस्यशरणंसुहृत् नवद्वारेपुरेदेहीहंसोलेलायतेबहिः वशीसर्वस्यलोकस्यस्था
वरस्यचरस्यच अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः सवेत्तिवेद्यंनच
तस्यास्तिवेत्तातमाहुरग्र्यंपुरुषंमहांतं अणोरणीयान्महतोमहीयानात्मागुहायांनिहितोस्य
3 जंतोः तमक्रतुंपश्यतिवीतशोकोधातुःप्रसादान्महिमानमीशं वेदाहमेतमजरंपुराणंस
र्वात्मानंसर्वगतंविभुत्वात् जन्मनिरोधंप्रवदंतियस्यब्रह्मवादिनोहिप्रवदंतिनित्यं ॥ इति
श्वेताश्वतरोपनिषदितृतीयोध्यायः ॥ यएकोवर्णोबहुधाशक्तियोगाद्वर्णाननेकान्निहि
तार्थोदधाति विचैतिचांतेविश्वमादौसदेवः सनोबुद्ध्याशुभयासंयुनक्तु तदेवाग्निस्तदादित्य ३
स्तद्वायुस्तदुचंद्रमाः तदेवशुक्रंतद्ब्रह्मतदापस्तत्प्रजापतिः त्वंस्त्रीत्वंपुमानसित्वंकुमारउतवा
कुमारी त्वंजीर्णोदंडेनवंचसित्वंजातोभवसिविश्वतोमुखः नीलःपतंगोहरितोलोहिताक्षः

लवानीशत ईशनीभिः सर्वाँल्लोकानीशत ईशनीभिः य एवैक उद्भवे संभवे च य एतद्विदुरमृतास्ते
भवन्ति एको हि रुद्रो न द्वितीयाय तस्थुर्य इमाँल्लोकानीशत ईशनीभिः प्रत्यङ् जनांस्तिष्ठति संचुकोचान्त
काले संसृज्य विश्वा भुवनानि गोपाः २ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ३ यो देवानां प्रभवश्चोद्भवश्च विश्वाधिपो रुद्रो
महर्षिः हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु या ते रुद्र शिवा तनूरघोरापाप
काशिनी तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ६ ततः परं ब्रह्म परं बृहन्तं यथानिकायं सर्वभूते
षु गूढं विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वामृता भवन्ति वेदाहमेतं पुरुषं महान्तमादित्यवर्णं
तमसः परस्तात् तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय यस्मात्परं नापरमस्ति किं
चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वं त
तो यदुत्तरतरं तदरूपमनामयं य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति सर्वान
नशिरोग्रीवः सर्वभूतगुहाशयः सर्वव्यापी स भगवांस्तस्मात्सर्वगतः शिवः महान्प्रभुर्वै
पुरुषः सत्त्वस्यैष प्रवर्तकः सुनिर्मलामिमां प्राप्तिमीशानो ज्योतिरव्ययः अंगुष्ठमात्रः पु

३ स्थि वं ज्ञात्वामृत्युपाशांश्छिनत्ति घृतात्परं मंडमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढं विश्वस्यैकं परिवेष्टितारं
४ ज्ञात्वा देवं मुच्यते सर्वपाशैः एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये संनिविष्टः हृदा मनी
सा ३ षा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवंति यदातमस्तन्न दिवा न रात्रिर्न सन्न चासंच्छिव एव केवलः
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी नैनमूर्ध्वं न तिर्यंचं न मध्ये परिजग्रभत् नत
स्य प्रतिमा अस्ति यस्य नाम महद्यशः न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं हृ
दा हृदिस्थं मनसा य एनमेवं विदुरमृतास्ते भवंति अजात इत्येवं कश्चिद्भीरुः प्रपद्यते रुद्र
यत्ते दक्षिणं मुखं तेन मां पाहि नित्यं मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः
4 वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतः सदमित्त्वा हवामहे ४ इति श्वेताश्वतरोपनिषदि चतुर्थो
ध्यायः द्वे अक्षरे ब्रह्मपरे त्वनंते विद्याविद्ये निहिते यत्र गूढे क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये
ईशते यस्तु सोन्यः यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः ऋषिं प्रसूतं
कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् एकैकं जालं बहुधा विकुर्वन्नस्मिन्क्षेत्रे संहरत्ये
ष देवः भूयः सृष्ट्वा पतयस्तथेशः सर्वाधिपत्यं कुरुते महात्मा सर्वा दिशः ऊर्ध्वमधश्च तिर्यक्प्रका ४
शयन्भ्राजते यद्वनड्वान् एवं स देवो भगवान्वरेण्यो योनिस्वभावानधितिष्ठत्येकः यच्च स्वभावं

स्तडिद्गर्भ ऋतवः समुद्राः अनादिमत्त्वं विभुत्वेन वर्तसे यतो जातानि भुवनानि विश्वा अजामेकां लो
हितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगा
मजोऽन्यः द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न
न्योऽभिचाकशीति समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीश
मस्य महिमानमिति वीतशोकः ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः यस्तन्न वेद
किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदंति १८
तस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्व
रं तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं सं च वि चैति
सर्वं तमीशानं वरदं देवमीड्यं निचाय्येमां शान्तिमत्यन्तमेति यो देवानां प्रभवश्चोद्भवश्च विश्वाधि
पो रुद्रो महर्षिः हिरण्यगर्भं पश्यत जायमानं स नो बुद्ध्या शुभया संयुनक्तु यो देवानामधिपो
यस्मिँल्लोका अधिश्रिताः य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम सूक्ष्मातिसूक्ष्मं क
लिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपं विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमत्यन्तमेति
स एव काले भुवनस्य गोप्ता विश्वाधिपः सर्वभूतेषु गूढः यस्मिन्युक्ता ब्रह्मर्षयो देवताश्च तमे

हि२

३. लयातिविंत्यं तत्कर्म कृत्वा विनिवृत्य भूयस्तत्त्वस्य तत्त्वेन समेत्य योगं एकेन द्वाभ्यां त्रिभिरष्टभिर्वा काले
४ न चैवात्मगुणैश्च सूक्ष्मैः आरभ्य कर्माणि गुणान्वितानि भावांश्च सर्वान्विनियोजयेद्यः तेषामभावे
कृतकर्मनाशः कर्मक्षये याति स तत्त्वतोन्यः आदिः स संयोगनिमित्तहेतुः परस्त्रिकालादकलोपि
५७ दृष्टः तं विश्वरूपं भवभूतमीड्यं देवं स्वचित्तस्थमुपास्य पूर्वं स वृक्षकालाकृतिभिः परोन्यो यस्मात्प्रपंचः
परिवर्ततेयं धर्मावहं पापनुदं भगेशं ज्ञात्वात्मस्थममृतं विश्वधाम तमीश्वराणां परमं महेश्वरं तं दे
वतानां परमं च दैवतं पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यं न तस्य कार्यं करणं च विद्य
ते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च न
5 तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिंगं स कारणं करणाधिपाधिपो न चास्य कश्चिज्ज
निता न चाधिपः यस्तंतुनाभ इव तंतुभिः प्रधानजैः स्वभावतः देव एकः समावृणोति स नो दधातु ब्रह्मा
व्ययं एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चे
ता केवलो निर्गुणश्च एको वशी निःक्रियाणां बहूनामेकं रूपं बहुधा यः करोति तमात्मस्थं येनु
पश्यंति धीरास्तेषां सुखं शाश्वतं नेतरेषां नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधा ६ ५
ति कामान् तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः न तत्र सूर्यो भाति न चंद्रता

पचति विश्वयोनिः पाच्यांश्च सर्वान्परिणामयेद्यः सर्वमेतद्विश्वमधितिष्ठत्येको गुणांश्च सर्वान्विनियो
जयेद्यः तद्वेदगुह्योपनिषत्सु गूढं तद्ब्रह्मा वेदते ब्रह्मयोनिं ये पूर्वं देवा ऋषयश्च तद्विदुस्ते तन्मया अमृ
ता वै बभूवुः गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता स विश्वरूपस्त्रिगुणस्त्रिव
र्त्मा प्राणाधिपः संचरति स्वकर्मभिः अंगुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो यः बुद्धे
र्गुणेनात्मगुणेन चैवाराग्रमात्रो ह्यवरोऽपि दृष्टः वालाग्रशतभागस्य शतधा कल्पितस्य च भागो
जीवः स विज्ञेयः स चानन्त्याय कल्पते नैव स्त्री न पुमानेष नैव चायं नपुंसकः यद्यच्छरीरमादत्ते
न० ७ तेन तेन स युज्यते संकल्पनस्पर्शनदृष्टिमोहैर्ग्रासाम्बुवृष्ट्यात्मविवृद्धिजन्म कर्मानुगान्यनुक्रमेण देही स्था
नेषु रूपाण्यभिसंप्रपद्यते स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणैर्वृणोति क्रियागुणैरा
त्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः अनाद्यनन्तं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपं
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः भावग्राह्यमनीडाख्यं भावाभावकरं शिवं क
लासर्गकरं देवं ये विदुस्ते जहुस्तनुं ॥ इति श्वेताश्वतरोपनिषदि पंचमोऽध्यायः ॥ स्वभावमेके क
वयो वदन्ति कालं तथान्ये परिमुह्यमानाः देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रं येना
वृतं नित्यमिदं हि सर्वं ज्ञः कालकालो गुणी सर्वविद्यः तेनेशितं कर्म विवर्तते ह पृथ्व्यप्तेजोनि

उ. रकंनेमाविद्युतोभांतिकुतोयमग्निः तमेवभांतमनुभातिसर्वं तस्यभासासर्वमिदंविभाति एकोहं
सोभुवनस्यास्यमध्येसएवाग्निःसलिलेसंनिविष्टः तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्य
तेयनाय सविश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालोगुणीसर्वविद्यः प्रधानक्षेत्रज्ञपतिर्गुणेशः
संसारमोक्षस्थितिबंधहेतुः सतन्मयोह्यमृतईशसंस्थोज्ञः सर्वगोभुवनस्यास्यगोप्ता यईशे
अस्यजगतोनित्यमेवनान्योहेतुर्विद्यतईशनाय योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोति
तस्मै तंहदेवमात्मबुद्धिस्वभावंमुमुक्षुर्वैशरणमहंप्रपद्ये निष्कलंनिष्क्रियंशांतंनिरवद्यंनिरंज
मिवा६ नं अमृतस्यपरंसेतुंदग्धेंधनमिवानलं यदाचर्मवदाकाशंवेष्टयिष्यंतिमानवाः तदादेवमविज्ञायदुःख
6 स्यांतोभविष्यति तपःप्रभावाद्देवप्रसादाच्चब्रह्महश्वेताश्वतरोथविद्वान् अत्याश्रमिभ्यःपरमंपवि
त्रंप्रोवाचसम्यगृषिसंघजुष्टं वेदांतेपरमंगुह्यंपुराकल्पेप्रचोदितं नाप्रशांतायदातव्यंनापुत्राय
नाशिष्यायवैपुनः यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाः प्रकाशं
तेमहात्मनःप्रकाशंतेमहात्मनइति २२ ॥इतिश्वेताश्वतरोपनिषदिषष्ठोध्यायः॥६॥
श्वेताश्वतरोपनिषत् ॐ रुक्मिणीसत्यभामासमेतश्रीकृष्णायनमः श्रीत्रिपुरसुंदर्यैनमः

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव। एकस्तथा सर्वभूतान्तरात्मा
भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव। एको वशी सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बभूव।

श्वेताश्वतरोपनिषत् [illegible] ६

[illegible]